श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामाष्टोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामाष्टोत्तरशतनामस्तोत्रम् ॥

श्रीराघवं दशरथात्मजं अप्रमेयं
सीतापतिं रघुकुलान्वयरत्नदीपम्।
आजानुबाहुं अरविन्ददळायताक्षं
रामं निशाचरविनाशकरं नमामि॥

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे
मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम्।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामळम्॥

श्रीरामो रामभद्रश्च रामचन्द्रश्च शाश्वतः।
राजीवलोचनः श्रीमान् राजेन्द्रो रघुपुङ्गवः॥ 1॥

जानकीवल्लभो जैत्रो जितामित्रो जनार्दनः।
विश्वामित्रप्रियो दान्तश्शरणत्राणतत्परः॥ 2॥

वालिप्रमथनो वाग्मी सत्यवाक् सत्यविक्रमः।
सत्यव्रतो व्रतधरः सदा हनुमदाश्रितः॥ 3॥

कौसलेयः खरध्वंसी विराधवधपण्डितः।
विभीषणपरित्राता हरकोदण्डखण्डनः॥ 4॥

सप्तसालप्रभेत्ता च दशग्रीवशिरोहरः।
जामदग्न्यमहादर्पदळनस्ताटकान्तकः॥ 5॥

वेदान्तसारो वेदात्मा भवरोगस्य भेषजः।
दूषणत्रिशिरो हन्ता त्रिमूर्तिस्त्रिगुणात्मकः॥ 6॥

त्रिविक्रमस्त्रिलोकात्मा पुण्यचारित्रकीर्तनः।
त्रिलोकरक्षको धन्वी दण्डकारण्यकर्तनः॥ 7॥

अहल्याशापशमनः पितृभक्तो वरप्रदः।
जितेन्द्रियो जितक्रोधो जितामित्रो जगद्गुरुः॥ 8॥

ऋक्षवानरसङ्घाती चित्रकूटसमाश्रयः।
जयन्तत्राणवरदः सुमित्रापुत्रसेवितः॥ 9॥

सर्वदेवादिदेवश्च मृतवानरजीवनः।
मायामारीचहन्ता च महादेवो महाभुजः॥ 10॥

सर्वदेवस्तुतः सौम्यो ब्रह्मण्यो मुनिसंस्तुतः।
महायोगी महोदारः सुग्रीवेप्सितराज्यदः॥ 11॥

सर्वपुण्याधिकफलः स्मृतसर्वाघनाशनः।
आदिपुरुषः परमपुरुषो महापूरुष एव च॥ 12॥

पुण्योदयो दयासारः पुराणपुरुषोत्तमः।
स्मितवक्त्रो मितभाषी पूर्वभाषी च राघवः॥ 13॥

अनन्तगुणगम्भीरो धीरोदात्तगुणोत्तमः।
मायामानुषचारित्रो महादेवादिपूजितः॥ 14॥

सेतुकृज्जितवाराशिः सर्वतीर्थमयो हरिः।
श्यामाङ्गः सुन्दरः शूरः पीतवासा धनुर्धरः॥ 15॥

सर्वयज्ञाधिपो यज्वा जरामरणवर्जितः।
विभीषणप्रतिष्ठाता सर्वापगुणवर्जितः॥ 16॥

परमात्मा परं ब्रह्म सच्चिदानन्दविग्रहः।
परं ज्योतिः परंधाम पराकाशः परात्परः॥
परेशः पारगः पारः सर्वदेवात्मकः परः॥ 17॥

॥ इति श्रीरामाष्टोत्तरशतनामस्तोत्रं समाप्तम्॥